**CSM – 44/16**

# Indian Language & Literature in Sanskrit

**Paper – I**

*Time : 3 hours*

*Full Marks : 300*

*The figures in the right-hand margin indicate marks.*

*The questions must be answered in Sanskrit using Devanagari Script.*

*Candidates should attempt Q. No. 1 from Section – A and Q. No. 5 from Section – B which are compulsory and **three** of the remaining questions, selecting at least **one** from each Section.*

## SECTION – A

1. कांश्चन त्रीन् विभागान् उत्तरयत : 20×3 = 60

(क) निम्नलिखितानां संज्ञानां विधायकं सूत्रं सोदाहरणं निरूपयत :

(i) टि

(ii) सर्वनाम

(iii) गुण

(iv) वृद्धि

(ख) अधोनिर्दिष्टानां शब्दानां ससूत्रं सन्धिं सन्धिविच्छेदं वा कुरुत :

(i) मद्ध्वरिः

(ii) रामश्चिनोति

(iii) गो+यूतिः

(iv) सन्+शम्भुः

(v) हर्य्यनुभवः

(vi) पुंस्कोकिलः

(vii) नायकः

(viii) नमः + करोति

(ix) श्री + ईशः

(x) सर्पिष्करोति

(ग) निम्नोक्तानां पदानां विभक्तयः ससूत्रं साधनीयाः

(i) शतं जयति देवदत्तम् ।

(ii) पुत्रेण सहागतः पिता।

(iii) मुक्तये हरिं भजति ।

(iv) अध्ययनात पराजयते।

(v) मातुः स्मरति ।

(घ) निम्नोक्तपदानां समासं विग्रहवाक्यं च ससूत्रं साधयत :

(i) उपकृष्णम्

(ii) राजपुरुषः

(iii) चित्रगुः

(iv) राजदन्ताः

(v) अहोरात्रः

2. भाषासाहित्यं प्रति संस्कृतभाषायाः अवदानं विशदयत । 60

3. महाभारतस्य परिचयं प्रतिपाद्य तत्र वर्णितानि प्रमुखचरित्राणि वर्णयत । 60

4. 'उपमा कालिदासस्य' इति उक्तिं कालिदाससाहित्ये सम्यक् समन्वयं कुरूत । 60

## SECTION – B

5. केचन् त्रयः प्रश्नाः समाधेयाः : 20×3 = 60

(क) भारतीयसंस्कृतौ कलास्थापत्ययोः प्रतिफलनं कथं भवतीति विश्लेषयत ।

(ख) मानवजीवने पुरूषार्थानां महत्त्वं वैशिष्ट्यं च वर्णयत ।

(ग) मानवजीवने प्रतिपादितानामाश्रमाणां विवेचनं कुरूत ।

(घ) राज्ञः विद्यासमुद्देशविधिं विशदयत ।

6. मीमांसादर्शनस्य परिचयं, तेषां सिद्धान्तांश्च प्रतिपादयत । 60

7. 'प्राचीनाधुनिकशिक्षाव्यवस्थयोः सन्तुलनम्' इति शीर्षकमवलम्ब्य प्रायः त्रिशतशब्दैः प्रबन्धमेकं लिखत । 60

8. गद्यांशममुमाश्रित्य अधः प्रदत्ताः प्रश्नाः समाधेया : 60

पुरातनकाले गौतममुनेः तपोवने कश्चिन्मुनिः आसीत् । तस्य नाम महातपाः । कदाचित् सः मुनिः आश्रमस्य समीपे काकमुखात् परिभ्रष्टमेकं मूषिकशावकं दृष्टवान् । करुणया तं मूषिकशावकमाश्रमम् आनीतवान् । प्रतिदिनं धान्यकणान् दत्त्वा तं प्रीत्या पोषितवान् । अल्पेन एव कालेन मूषिकः सम्यक् प्रवृद्धः । अथ कदाचित् कश्चन मार्जारः तत्रागतवान् । मार्जाराद् भीतः मूषिकः मुनेः समीपमागत्य कथितवान्- 'पूज्य ! एषः मार्जारः मां खादितुमागच्छति । कृपया मार्जारान्मां रक्षतु भवान्' इति । मुनिः– 'भीतिः माऽस्तु । अहं भवन्तमपि मार्जारं करोमि' इत्युक्त्वा स्वतपःप्रभावेण तं मूषिकं मार्जारं कृतवान् । पुनः कदाचित् कश्चन शुनकः तत्रागतवान् । शुनकाद् भीतः मार्जारः मुनेः समीपमागत्योक्तवान्- 'पूज्य ! पश्यतु एतं दुष्टशुनकम् । सः मां खादितुमिच्छति । कृपया शुनकान्मां रक्षतु भवान्, इति । मुनिः– 'चिन्ता माऽस्तु । अहं भवन्तमपि शुनकं करोमि' इत्युक्त्वा तं मार्जारं शुनकं कृतवान् । पुनः कदाचित् कश्चन व्याघ्रः तत्रागतवान् । व्याघ्राद् भीतः शुनकः पुनरपि मुनेः समीपमेव शरणं गतवान् । मुनिमुक्तवांश्च- 'पूज्य ! एतस्मान्निष्ठराद् व्याघ्रान्मां रक्षतु भवान्' इति । मुनिः यथापूर्वं 'चिन्तां मा करोतु भवान् । अहं भवन्तमपि व्याघ्रं करोमि' इत्युक्त्वा तं शुनकं व्याघ्रं कृतवान् । अनन्तरं च सः व्याघ्रः निर्भयेन आश्रमे सर्वत्र अटति । मुनिस्तु तं व्याघ्रं मूषिकमिव पश्यति स्म । तस्माद् व्याघ्रात्तस्य तु किञ्चिदपि भयं नासीदेव । आश्रमेऽन्येऽपि जनाः वासं कुर्वन्ति स्म । ते सर्वे तं व्याघ्रं दृष्ट्वा कथितवन्तः–एषः व्याघ्रः वास्तविकः व्याघ्रः न । एषः मुनिः

तपःप्रभावेण तं मूषिकं व्याघ्रं कृतवानस्ति । तच्छ्रुत्वा व्याघ्रः चिन्तितवान्-'यावत्पर्यन्तमेषः मुनिः जीवति तावत्पर्यन्तं जनाः एवमेव वदन्ति । एषाऽपकीर्त्तिः दूरीकरणीया चेन्मया मुनिः मारणीयः एव । अतः तमिदानीमेव मारयामि' इति चिन्तयित्वा मुनेः समीपं गतवान् ।

**प्रश्नाः**

(क) महातपाः तपोवने कं दृष्टवान्, किं च कृतवान् ?

(ख) मार्जाराद् भीतः मूषिकः मुनिं किं कथितवान् ?

(ग) शुनकाद् भीतः मार्जारः मुनिं किमुक्तवान् ?

(घ) व्याघ्राद भीतः शुनकः मुनिं किं गदितवान् ?

(ङ) शुनकः व्याघ्रो भूत्वा आश्रमे कथं स्थितवान् ?

(च) व्याघ्रः मुनिं कथं मारयितुं चिन्तितवान् ?